**दिनाङ्क :- 11.08.2026**
**प्रात: - 06:55**

## अथवार्ता:

### राज्यसभा

संसदा करविषयकानां तथा अन्येषां विधीनां संशोधनविधेयकं, विंशतिः षड्विंशतिः इति पारितम्। राज्यसभया ह्यः चर्चानन्तरम् एतत् लोकसभायै प्रत्यर्पितम्। लोकसभया एतद् विधेयकं पूर्वमेव पारितम् आसीत्। केन्द्रीयवित्तमन्त्री निर्मला सीतारमन् विधेयकम् प्रस्तुतवती आसीत्। विधेयकेन धनप्रदान-परिशोधन-व्यवस्थाधिनियमः, सप्ताधिक-द्विसहस्रतमः, आयकराधिनियमः, विंशतिः पञ्चविंशतिः तथा वित्ताधिनियमः, विंशतिः षड्विंशतिः चेत्येतेषु संशोधनं प्रस्ताव्यते। अनेन अधिनियमेन आयकर-संशोधन-अध्यादेशः, विंशतिः षड्विंशतिः इति प्रभावहीनः भविष्यति, यः अस्य वर्षस्य जून-मासस्य पञ्चमे दिनाङ्के प्रख्यापितः आसीत्। चर्चायाः प्रत्युत्तरं ददती केन्द्रीयवित्तमन्त्री अवदत् यत् विधेयकस्य उद्देश्यं भारतस्य विनिर्माण-परितन्त्रस्य सुदृढीकरणम्, अतिरिक्तनिवेशस्य आकर्षणम्, आजीविकायाः सृजनं तथा विनिर्माणगतिविधीनां प्रोत्साहनम् अस्ति। सा अवदत् यत् द्वितीयः प्रमुखः संशोधनः भारतस्य निर्दिष्टेभ्यः दत्तांशकेन्द्रेभ्यः दत्तांशसेवाः प्राप्नुवतीनां वैदेशिकसंस्थानां करमुक्तिप्रदानेन अथ व्यवसायसञ्चालनस्य च सुगमतायाः वर्धनेन सम्बन्धितः अस्ति। मन्त्रिणा स्पष्टीकृतं यत् विधेयकेन यूपीआई इति प्रयोक्तृभ्यः कश्चन करः उत वा व्यवहारशुल्कं न आरोप्यते। संसदा बैङ्कर्स-बुक्स-एविडेन्स्-विधेयकं, विंशतिः षड्विंशतिः अपि पारितम्। राज्यसभया तत् ह्यः अनुमोदितम् आसीत् एवञ्च लोकसभया तत् पूर्वमेव पारितम् आसीत्।

### गृहमन्त्रालयः - पत्तनानि

प्रशासनेन एकादश-नूतनानि अन्ताराष्ट्रिय-पत्तनानि अधिसूचितानि, येन ई-वीजा धारकानां वैदेशिकनागरिकाणां भारतप्रवेशः सुलभः भविष्यति। गृहमन्त्रालयेन उक्तं यत् एतेषु नव-भूपत्तनानि द्वे च विमानपत्तने सम्मिलिते स्तः। एतेषु भोपालस्य तिरुपतेः च विमानपत्तने तथा अटारी-अगरतला इत्येतयोः भूपत्तनानि सम्मिलितानि सन्ति। मन्त्रालयेन उक्तं यत् नूतनानां पत्तनानां समावेशेन इलेक्ट्रॉनिक-वीजा इत्येतस्य उपयोगिता आकर्षणं च अधिकं वर्धिष्यते। मन्त्रालयानुसारं भारतं प्रायः पञ्चनवतिप्रतिशतं यावत् ई-वीजा आवेदनानि द्विसप्ततिहोरातः न्यूनसमये निस्तारयति। नूतनपत्तनानां समावेशेन ई-वीजा धारकानां वैदेशिकनागरिकाणां प्रवेशाय अनुमतानाम् अन्ताराष्ट्रिय-पत्तनानां सङ्ख्या आहत्य अष्टाशीतिः जाता। एतेषु सप्तत्रिंशत् विमानपत्तनानि, अष्टात्रिंशत् सामुद्रिकपत्तनानि तथा त्रयोदश भूपत्तनानि च सम्मिलितानि सन्ति।

### पीयूषगोयलः

वाणिज्योद्योग-मन्त्री पीयूषगोयलः अवदत् यत् प्रशासकीय-ई-मार्केट्-प्लेस् (जेम्) इतीदं उच-गुणवत्तायुक्तस्य, उचितमूल्येन, उचितसमये, उचित-उत्पादस्य क्रयणं प्रतिबिम्बयति। नवदिल्ल्यां जेम् इत्यस्य दशवर्षाणां पूर्त्युत्सवस्य अवसरे मन्त्री उक्तवान्। श्रीगोयलः स्मारितं यत् जेम्. इत्यस्य प्रवर्तनात् प्राक् सार्वजनिक-धनस्य दुरुपयोगः भवति स्म, सुशासनस्य अभावः च आसीत्। श्री गोयलः अवदत् यत् सञ्चितरुपेण, जेम्. इत्यनेन पटलेन त्रि-कोट्यधिकानां आदेशानाम् माध्यमेन विंशति-लक्ष-कोटिरूप्यकाणां वस्तूनां सेवानां च क्रयणे साहाय्यं कृतम्। सः प्रतिपादितवान् यत् प्रथम-अष्टवर्षेषु दशलक्षकोटि-रूप्यकाणां क्रयणं जातम्, तदनन्तरं दशलक्षकोटि-रूप्यकाणां क्रयणं केवलं वर्षद्वयोः एव अभवदिति।

### ऋतुविभागः

भारतर्तु-विज्ञान-विभागेन अद्य हिमाचलप्रदेशे पूर्वराजस्थाने च अतिवृष्ट्यै नारङ्गवर्णपरा सञ्चेतना प्रख्यापिता। ऋतुविभागनुसारेण अद्य अरुणाचलप्रदेश-असम-मेघालय-छत्तीसगढ-गाङ्गीयपश्चिमबङ्गाल-गुजरात-हरियाणा-चण्डीगढ-नवदिल्ली इत्येतेषां स्थलानां कतिपयेषु स्थानेषु अतिवृष्टिः सम्भाव्यते।

**।। इति वार्ता:।।**